# 15628 120 MINUTES

1. प्राचीनतमः भाषावैज्ञानिकः अस्ति ----
   A) प्लेटो B) देवेन्द्रनाथशर्मा
   C) ग्रासमन D) पाणिनिः
2. कस्मिन् वेदाङ्गे ध्वनिविज्ञानस्य विवेचना दरी दृश्यते?
   A) व्याकरणवेदाङ्गे B) शिक्षावेदाङ्गे
   C) निरुक्तवेदाङ्गे D) कल्पवेदाङ्गे
3. सर्वाधिकभाषाः कस्मिन् परिवारे समुपलभ्यन्ते ?
   A) भारोपीयपरिवारे B) सामीपरिवारे
   C) आस्ट्रेलियाई परिवारे D) अमरीकीपरिवारे

4. एकाक्षरी भाषा का ----
   A) संस्कृतम् B) चीनी C) बान्टू D) मिस्त्री

5. अधो लिखितेषु भाषासंवर्गेषु कोऽप्येकः भारोपीयभाषा संवर्ग नास्ति ---
   A) तमिल - तेलुगु - मलयालमाः B) संस्कृत - पालि - प्राकृताः
   C) अंग्रेजी - रूसी - जर्मनाः D) लैटिन् - ग्रीक् - अवेस्ताः

6. कस्य कारणस्य प्रभावात् स्कूल् इत्यस्य इस्कूल् इति उच्चारणं क्रियते।
   A) आगमस्य B) समीकरणस्य
   C) विषमीकरणस्य D) स्वरभक्तेः

7. वर्गाणां प्रथमतृतीयपञ्चमाः यणश्च ----
   A) महाप्राणाः B) स्वरिताः
   C) अल्पप्राणाः D) विवृताः
8. हक्वोः (ह+कु) उच्चारणस्थानम् अस्ति ---
   A) जिह्वा B) कण्ठः C) तालुः D) ओष्ठौ
9. वानरः = बन्दरः इत्यत्र ध्वनिपरिवर्तनस्य हेतुरस्ति ---------
   A) स्वरागमः B) व्यञ्जनागमः C) स्वरभक्तिः D) व्यञ्जनलोपः
10. संस्कृतभाषायाम् अन्तःस्थवर्णाः कति सन्ति ?
   A) ०४ B) ०५ C) १३ D) २५
11. रेफः कस्मिन् ध्वनिसंवर्गे परिगणितः वैयाकरणैः ?
   A) अनुनासिकसंवर्गे B) स्पर्शसंवर्गे
   C) ऊष्मसंवर्गे D) अन्तस्थसंवर्गे
12. मानस्वरेषु पञ्चस्वराः के ?

A) इ,ई,ए,ऐ,ओ B) अ,इ,उ,ऋ,लृ
C) उ,ऊ,ओ,औ,आ D) ऋ,लृ,ए,ऐ,आ

13. ग्रासमनमते दधामि इत्यस्य मूलरूपं ---- आसीत्।
A) धधामि B) ददामि
C) दाधामि D) दापयामि

14. प्राचीनलिपिषु वर्णमालारहितलिपि अस्ति---
A) अरबीलिपिः B) लैटिनलिपिः
C) सिन्धुघाटीलिपिः D) ब्राह्मीलिपिः

15. General Linguistics may be defined as----
A) Science of Linguistics B) Science of Philosophy
C) Science of Language D) Science of Literature

16. अष्टाध्याय्यां सर्वनामस्थानसंज्ञाविधायकानि सूत्राणि कति सन्ति ?
A) ०१ B) ०४ C) ०२ D) ०३

17. वृद्धिसंज्ञा विधायकं सूत्रं किम् ?
A) वृद्धिरेचि B) वृद्धिर्यस्याचामादिस्तद् वृद्धम्
C) मृजे र्वृद्धिः D) वृद्धिरादैच्

18. केन सूत्रेण नदी संज्ञा --
A) आण्नद्याः B) अम्बार्थनद्योर्हस्वः
C) यू स्त्र्याख्यौ नदी D) नद्यृतश्च

19. **भूपति**शब्दस्य घि संज्ञा केन सूत्रेण भवति ?
A) शेषो घ्यसखि B) घेर्ङिति
C) पतिः समास एव D) अच्च घेः

20. **उरूमात्री** इत्यत्र प्रत्ययः भवति -----
A) ङीष् B) ङीन् C) ङीप् D) ति

21. **गोपस्य स्त्री** इति विग्रहे किं पदं समीचीनम् अस्ति
A) गोपा B) गोपी C) गोपिः D) गोपालिका

22. सूर्या का ?
A) सूर्यस्य देवता स्त्री B) या स्वरं सरति
C) या अपरं सारयति D) सूर्यस्य मानुषी स्त्री

23. युवन् शब्दस्य स्त्रीवाचकं रूपम् --
A) युवतिः B) युवती C) युवा D) युवनी

24. विभाषा कृञि इति सूत्रेण का संज्ञा ?

A) उपसर्ग B) धातु C) गति D) विभाषा

25. कर्तृकर्मणोः कृतिः इति सूत्रेण का विभक्तिः विधीयते।
A) द्वितीया B) षष्ठी C) तृतीया D) पञ्चमी

26. साधकतमम् --
A) करणम् B) अधिकरणम् C) कर्म D) सम्प्रदानम्

27. **आख्यानोपयोगे** इति सूत्रेण भवति -
A) कर्मसंज्ञा B) करणसंज्ञा C) सम्प्रदानसंज्ञा D) अपादानसंज्ञा

28. उपपदतत्पुरुषसमासस्य उदाहरणम् -
A) यूपदारुः B) अक्षशौण्डः C) अतिमालः D) कुम्भकारः

29. अविद्यमानः पुत्रः यस्य सः = ------
A) दुष्टपुत्रः B) अपुत्रः C) न पुत्रः D) ईषद्पुत्रः

30. **गोसुखम्** इति पदस्य अलौकिकविग्रहः अस्ति -
A) गो भ्यस् सुख अम् B) गो टा सुख अम्
C) गो ङि सुख अम् D) गो आम् सुख अम्

31. यजुर्वेदस्य मन्त्रसंख्या ---
A) ३०१ B) ३०३ C) ३०२ D) ३००

32. अथर्ववेदीयः ब्राह्मणग्रन्थः ---
A) गोपथब्राह्मणम् B) तैत्तिरीयब्राह्मणम्
C) मैत्रायणीब्राह्मणम् D) आर्षेयब्राह्मणम्

33. उष्णिक्छन्दे कति वर्णाः विद्यन्ते ?
A) २० B) २८ C) ३२ D) ३६

34. ज्योतिषवेदाङ्गे प्रतिपाद्य विषयः कः ?
A) लोकज्ञानम् B) वृत्तिज्ञानम् C) कालज्ञानम् D) अर्थज्ञानम्

35. **चरैवेति** कस्य ब्राह्मणस्य वाक्यमिदम् ?
A) कौशीतकीब्राह्मणस्य B) ऐतरेयब्राह्मणस्य
C) आर्षेयब्राह्मणस्य D) गोपथब्राह्मणस्य

36. गायत्रीमन्त्रस्य उपास्यदेवता ---
A) अग्निः B) इन्द्रः C) सविता D) वृत्रः

37. सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् इति मन्त्रेण सम्बद्धः वेदविशेषः---

A) ऋग्वेदः B) सामवेदः C) शुक्लयजुर्वेदः D) कृष्णयजुर्वेदः

38. आर्षकाव्येषु चतुर्विंशतिसाहस्त्री अस्ति ----

A) महाभारतम् B) नैषधीयचरितम्

C) रामायणम् D) शिशुपालवधम्

39. लघुत्रय्यां परिगण्यते ---

A) रघुवंशम् B) शिशुपालवधम्

C) किरातार्जुनीयम् D) नैषधीयचरितम्

40. रघुवंशस्य त्रयोदशे सर्गे का कथा वर्णिता अस्ति ?

A) रावणवधम् B) रामस्य अयोध्याप्रत्यागमनम्

C) रामस्य राज्याभिषेकः D) सीतापरित्यागः

41. अभिज्ञानशाकुन्तले कयोः रसयोरपूर्वसम्मेलनं विद्यते ?

A) श्रृङ्गार - वीरयोः B) श्रृङ्गार - हास्ययोः

C) श्रृङ्गार-करुणयोः D) श्रृङ्गार-शान्तयोः

42. **लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः**- कस्य वचनमिदम् ?

A) विदूषकस्य B) राज्ञः C) शकारस्य D) विटस्य

43. नैषधीयचरिते प्रधानरसः कः ?

A) श्रृङ्गाररसः B) करुणरसः C) वीररसः D) शान्तरसः

44. काव्येषु माघः इत्युक्त्या किं काव्यं प्रसिद्धम् ?

A) श्रीमद्भागवतम् B) रघुवंशम्

C) किरातार्जुनीयम् D) शिशुपालवधम्

45. चारुदत्तस्य परिचारिका का ?

A) सुदक्षिणा B) अरुन्धती C) सुमतिः D) वसन्तसेना

46. **प्रवक्तुमिच्छन्ति मृषा हितैषिणः** - अलङ्कारः कः ?

A) उपमालङ्कारः B) उत्प्रेक्षालङ्कारः

C) काव्यलिङ्गालङ्कारः D) अतिशयोक्त्यलङ्कारः

47. **तितीर्षुर्दुस्तरं मोहदुडुपेनास्मि सागरम्** इत्यत्र --- अलङ्कारः।

A) निदर्शना B) अप्रस्तुतप्रशंसा C) प्रतिवस्तूपमा D) दृष्टान्तः

48. **प्रियाऽनुरागस्य मनः समुन्नते न भुजार्चितानां** - कः अलंकारः ?

A) मालोपमालङ्कारः B) लुप्तोपमालङ्कारः

C) उत्प्रेक्षालङ्कारः D) काव्यलिङ्गालङ्कारः

49. **ईप्सितं तदवज्ञानाद् विद्धिसार्गलमात्मन** अत्र अलङ्कारः कः ?

A) उत्प्रेक्षा B) मालोपमा C) अर्थान्तरन्यासः D) दीपकम्

50. अन्योन्यालङ्कारस्य लक्षणं किम् ?

A) यथोत्तरं चेत्पूर्वस्य B) क्रियया तु परस्परम्

C) भिन्नदेशतया अत्यन्तं D) समं योम्यतमा

51. अलङ्कारकौस्तुभम् इति ग्रन्थस्य कर्ता कः ?

A) पण्डितराजजगन्नाथः B) कविकर्णपूरः

C) केशवमिश्रः D) अप्पयदीक्षितः

52. **ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः** अत्र अलङ्कारः -

A) व्याजस्तुतिः B) काव्यलिङ्गम् C) पर्यायोक्तिः D) स्वभावोक्तिः

53. **अयं मार्ताण्डः किं स खलु तुरगै सप्तभिरितः** कः अलङ्कारः ?

A) रूपकालङ्कारः B) स्वभावोक्तिः

C) उपमा D) सन्देहालङ्कारः

54. श्लेषः कतिविधः ?

A) द्विविधः B) त्रिविधः C) अष्टविधः D) चतुर्विधः

55. अप्रस्तुतप्रशंसालङ्कारः कतिविधः ?

A) द्विविधः B) चतुर्विधः C) पञ्चविधः D) सप्तविधः

56. द्रुतविलम्बितस्य लक्षणं ----

A) नभौ भरौ B) तौ जरौ C) शत्परैर्न लगै D) तभजा जगौ

57. शिखरिणी वृत्ते कति अक्षराणि भवन्ति ?

A) द्वादश B) सप्तदश C) ऊनविंशति D) विंशति

58. ----- छन्दसि एकविंशति अक्षराणि भवन्ति।

A) हरिणी B) स्रग्धरा C) पृथ्वी D) आर्या

59. आर्या कस्मिन् छन्दसि अन्तर्भवति ?

A) अर्थसमवृत्ते B) मात्रा C) समवृत्ते D) अत्यष्टिः

60. जसौ जसलया वसुग्रहयतिश्च -----गुरुः।

A) शिखरिणी B) स्रग्धरा C) हरिणी D) पृथ्वी

61. अश्लीलं कतिविधम् ?

A) द्विविधम् B) त्रिविधम् C) पञ्चविधम् D) षड्विधम्

62. भागवतटीकायां --- टीका अतीव प्रसिद्धाऽस्ति।

A) कासाञ्जन टीका B) श्रीधरा टीका

C) सुकपक्षीया टीका D) भागवतचन्द्र चन्द्रिका टीका

63. गङ्गेशोपाध्यायः कस्य भूभागस्य निवासी ?

A) कन्याकुब्जस्य B) मिथिलायाः

C) हस्तिनापुरस्य D) कलिङ्गदेशस्य

64. वेदान्तदर्शने कति अध्यायाः विद्यन्ते ?

A) अष्ट B) चत्वारः C) सप्त D) पञ्च

65. भारविः कस्य सभापण्डित आसीत् ?

A) चालुक्यवंशी - विष्णुवर्धनमहोदयस्य B) विक्रमादित्यस्य

C) जयचन्द्रस्य D) हर्षदेवस्य

66. **आप्तवाक्यम्** नाम -

A) अनुमानम् B) अर्थः C) उपमानम् D) शब्दः

67. नैय्यायिकमते मोक्षः नाम कः ?

A) आत्यन्तिकदुःखध्वंसोः

B) स्वकर्त्तव्यत्व प्रकारक बोधानुकूलो व्यापारः

C) शब्दप्रकृतिरपभ्रंशः

D) ज्ञानविषयताऽवच्छेदकत्वमेवेष्ट साधनत्वम्

68. उपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वं च कैः स्वीक्रियते ?

A) वैयाकरणैः B) नैय्यायिकैः C) मीमांसकैः D) साहित्यकैः

69. नागेशमते अधिकारः कतिविधः ?

A) द्विविधः B) त्रिविधः C) चतुर्विधः D) सप्तविधः

70. ध्रुवस्य पिता कः ?

A) उत्थानपादः B) प्रियवतः C) नारदः D) स्वायम्भुवः

71. कुलशेखरस्य काव्यं किम् ?

A) रुद्राक्षमाला B) द्राक्षामाला C) मुकुन्दमाला D) मुक्तकमाला

72. पाँचाली स्वयंवरचम्पूकाव्यस्य कर्ता कः ?

A) नारायणभट्टः B) भोजः C) रामचन्द्रः D) चक्रकविः

73. केरलाभरणाचम्पू कस्य रचना ?

A) राघवाचार्यस्य B) वेङ्कटाचार्यस्य C) रामचन्द्रदीक्षितस्य D) श्रीकृष्णस्य

74. वासुदेवस्य काव्यं भवति ---

A) युधिष्ठिरविजयम् B) हरविजयम् C) चन्द्रविजयम् D) रघुविजयम्

75. कृष्णविलासकाव्यस्य कर्ता कः ?

A) सुकुमारकविः B) नारायणकविः C) वासुदेवकविः D) श्रीकृष्णकविः

76. रघुवंशस्य व्याख्यानं केन विरचितम् ?

A) मल्लिनाथेन B) वल्लभदेवेन

C) नारायणपण्डितेन D) अरुणगिरिनाथेन

77. औचित्यसम्प्रदायस्य प्रवर्तकः आचार्यः कः ?

A) वामनः B) कुन्तकः C) क्षेमेन्द्रः D) रुद्रटः

78. ध्वनिसम्प्रदायस्य प्रवर्तकः---

A) राजशेखरः B) आनन्दवर्धनः C) वामनः D) कुन्तकः

79. **अलङ्कारसर्वस्वम्** कस्य कृतिरस्ति ?

A) रुय्यकस्य B) शारदातनयस्य C) रुद्रटस्य D) हेमचन्द्रस्य

80. साहित्यदर्पणे रसात्मकम् इति पदस्य विग्रहः ---

A) रसे आत्मा यस्य B) रसस्य आत्मा

C) रस एव आत्मा यस्य D) रसः आत्मनि यस्य

81. वेदान्तसारस्य प्रज्ञा नाम्नी टीकायाः प्रणेता कः ?

A) डॉ.मिथिलेश पाण्डेयः B) डॉ.विजयकर्णः

C) डॉ.श्यामानन्दमिश्रः D) डॉ.हरीश्वरदीक्षितः

82. उपासनानां प्रयोजनं किम् ?

A) चित्तैकाग्रयम् B) स्वर्गप्राप्तिः C) प्रत्यवायप्राप्तिः D) पापक्षयमात्रम्

83. अग्नेः विकृति किम् ?

A) पृथिवी B) जलम् C) जीवः D) वायुः

84. निम्बार्काचार्यः ----- मतस्य प्रवर्तकः अस्ति।

A) विशिष्टाद्वैतस्य B) साङ्ख्यदर्शनस्य C) शुद्धाद्वैतस्य D) द्वैताद्वैतस्य

85. आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः इति मन्त्रः कुत्र उल्लिखितमस्ति ?

A) कठोपनिषदि B) मुण्डकोपनिषदि

C) बृहदाररण्यकोपनिषदि D) प्रश्नोपनिषदि

86. कपिलमुनेः शिष्यः आसीत्----

A) विज्ञानभिक्षुः B) आसुरिः C) ईश्वरकृष्णः D) पञ्चशिखः

87. आत्मानं प्रकाश्य नर्तकी इव का निवर्तते ?

A) बुद्धिः B) तन्मात्राणि C) प्रकृतिः D) इन्द्रियाणि

88. वेदान्तशब्दस्य प्रथमप्रयोगः कस्याम् उपनिषदि मिलति ?

A) प्रश्नोपनिषदि B) मुण्डकोपनिषदि

C) माण्डूक्योपनिषदि D) कठोपनिषदि

89. **सत्यमेव जयते** इति वाक्येन सम्बद्धः उपनिषद् ग्रन्थः ---- अस्ति।
A) तैत्तिरीयोपनिषद् B) मुण्डकोपनिषद् C) कठोपनिषद् D) प्रश्नोपनिषद्

90. ओङ्कारस्य रहस्यवर्णनं --- उपनिषदि वर्तते।
A) मुण्डकोपनिषदि B) कठोपनिषदि C) माण्डूक्योपनिषदि D) केनोपनिषदि

91. **शब्दो नित्यः शब्दत्वात्** इत्यत्र कः हेत्वाभासः ?
A) साधारणः B) बाधितः C) असाधारणः D) विरुद्धः

92. प्रत्यक्षज्ञान करणम् ---
A) शब्दः B) प्रत्यक्षम् C) अनुमानम् D) उपमानम्

93. प्रमा करणं -
A) ज्ञानम् B) अपवर्गः C) प्रमाणम् D) संस्कारः

94. अभावप्रत्यक्षे कः सन्निकर्षः ?
A) समवायः B) संयोगः
C) विशेषणविशेष्यभावः D) संयुक्तसमवेतसमवायः

95. नैय्यायिकमतानुसारेण चैत्रः पचति इति वाक्यस्य कीदृशः शब्दबोधः
A) विक्लित्य प्रतिकूल व्यापारानुकूल
B) विक्लित्यनुकूलव्यापारानुकूल
C) क्रियान्तराऽऽकाङ्क्षोत्यपकताऽवच्छेदक
D) प्रत्ययार्थ समानाधिकरण

96. न्यायदर्शनस्य कर्ता कः ?
A) कपिलः B) गौतमः
C) कणादः D) रामानुजाचार्यः

97. आलोचनमात्रम् वृत्तिरस्ति ---
A) कर्मेन्द्रियाणाम् B) महाभूतानाम् C) ज्ञानेन्द्रियाणाम् D) पुरुषाणाम्

98. बुद्धेः कति भेदाः सन्ति ?
A) ०५ B) ०७ C) ०८ D) १२

99. तर्कसंग्रहस्य **दीपिका** टीकायाः प्रणेता कः अस्ति ?
A) वाचस्पतिमिश्रः B) श्रीसीतारामभट्टः
C) अन्नम्भट्टः D) केशवमिश्रः

100. लिङ्गं कतिविधम् ?
A) त्रिविधम् B) चतुर्विधम् C) द्विविधम् D) पञ्चविधम्

101. नञ् कतिविधः ?

A) द्विविधः B) पञ्चविधः C) चतुर्विधः D) त्रिविधः

102. लृटः कोऽर्थः ?

A) भविष्यत् सामान्यार्थः B) विध्याद्यर्थः

C) क्रियासामान्यार्थः D) वर्तमानसामान्यार्थः

103. **गां दोग्धि दुग्धं गोपालकः** इदं कस्योदाहरणम् ?

A) कर्तृकर्मणः B) अकथितकर्मणः

C) अभिहितकर्मणः D) अनभिहितकर्मणः

104. अण् प्रत्याहारान्तर्गताः वर्णाः के ?

A) अ,इ,उ,ऋ वर्णाः B) अ,इ,उ वर्णाः

C) य,व,र,ल वर्णाः D) ए,ऐ,ओ,औ वर्णाः

105. पतञ्जलेः मातुर्नाम किम् ?

A) गोपिका B) गोणिका C) गोथिका D) गोपालिका

106. अष्टादश भेदवन्तो वर्णाः के सन्ति ?

A) उ,ऊ,ऋ,लृ इत्येते वर्णाः B) ए,ओ,ऐ,औ, इत्येते वर्णाः

C) अ,इ,उ,ऋ, इत्येते वर्णाः D) आ,ऐ,उ,ऊ इत्येते वर्णाः

107. **या स्वयं व्याख्यात्री** विद्यते सा ---

A) आचार्य B) आचार्या C) आचार्याणी D) उपाध्याया

108. **तिलेषु तैलम्** इत्यत्र कीदृशमधिकरणम् ?

A) अभिव्यापकम् B) अधिव्यापकम्

C) औपश्लेषिकम् D) वैषयिकम्

109. **महाभाष्यम्** इति शब्देन कस्य भाष्यमवबुध्यते ?

A) कात्यायनस्य B) पतञ्जलेः

C) रामानुजस्य D) नागेशभट्टस्य

110. **महान् चासौ राजा = महाराजः** इत्यत्र कः समासः ?

A) द्विगुः B) व्यधिकरणतत्पुरुषः

C) द्वन्द्वः D) समानाधिकरणतत्पुरुषः

111. मङ्गलस्य शत्रुः कः ?

A) रविः B) बुधः C) शनिः D) चन्द्रः

112. मुहूर्तमार्तण्डस्य कर्ता कः ?

A) दिनकरः B) नारायणः C) नीलकण्ठः D) गणेशः

113. कन्यामिथुनयोः स्वामी --- भवति।

A) रविः B) कुजः C) बुधः D) गुरुः

114. **बृहज्जातकं** कस्य ग्रन्थः ?

A) भास्कराचार्यस्य B) आर्यभट्टस्य

C) वराहमिहिरस्य D) परमेश्वरस्य

115. कालपुरुषस्य आत्मा कः भवति ?

A) चन्द्रः B) सूर्यः C) कुजः D) बुधः

116. **आर्चज्योतिष** इत्यस्य ज्योतिषवेदाङ्गस्य कर्ता कः ?

A) सुरेश्वराचार्यः B) यास्काचार्यः

C) लगधाचार्यः D) वल्लभाचार्यः

117. बृहस्पते आधिपत्य राशी के ?

A) धनुर्मीने B) मकरकुम्भे C) मेषवृश्चिके D) कन्यामिथुने

118. मकर राशीशः कः ?

A) कुजः B) राहुः C) मन्दः D) सूर्यः

119. **पीतवर्णः** कस्य ग्रहस्य भवति।

A) केतुः B) बृहस्पतिः C) बुधः D) चन्द्रः

120. तिथिनिर्णयः केन निर्मितम् ?

A) म.म.रज्जेमिश्रेण B) पक्षधरमिश्रेण

C) कमलाकरमिश्रेण D) रामचन्द्रमिश्रेण

…………………